द्वितीयः पाठः

# न मूर्खमुपदिशेत्

## आमुखम्

संस्कृतसाहित्ये कथानां महत्वपूर्णं स्थानं वर्तते। ताः उपदेशद्वारा जनमनांसि परिवर्तयन्ति। बालानां कथासु तात्पर्यं सुविदिता। अत एव श्रीमतः विष्णुशर्मणः पञ्चतन्त्रात् कापि कथा समुद्धृता। अनया कर्तव्याकर्तव्यविचारः बोध्यते।

**पाठस्य नाम** - न मूर्खमुपदिशेत्।

**उद्देश्यम्** - मूल्यबोधज्ञानं कृत्याकृत्यविवेचनं च।

**कालांशः** - १०

**आधारग्रन्थसूची** - पञ्चतन्त्रम्।

| आशयाः / धारणाः / व्यवहाररूपाणि | पठनप्रवर्तनानि / पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| कथा, | | |
| पदानाम् अर्थज्ञानम्। | पदार्थचयनम्। | पदार्थावगमनम्। |
| कथाकथनसामर्थ्यम्। | कथाकथनम्। | कथाः पठित्वा कथापात्राणां वैशिष्ट्यं वदति लिखति च। |
| वाक्यरचनासामर्थ्यम्। | वाक्यरचनाकेलिः। | अव्ययानि उपयुज्य वाक्यानि रचयति। |
| वार्तालेखनसामर्थ्यम्। | वार्तालेखनम्। | कथाः वार्तारूपेण परिवर्तयति। |
| क्रमीकरणसामर्थ्यम्। | कथास्तम्भक्रमीकरणम्। | कथाकथने नैपुण्यं सम्पादयति। |
| लकारज्ञानम्। | लकाररूपलेखनम्। | लकाररूपाणि स्वयं लिखति। |

**आख्यानम्।**

कक्ष्यां प्रविश्य अध्यापकः छात्रान् एवं वदतु "अयि भोः, भवन्तः केषां केषां मृगाणां नामानि जानन्ति? वदन्तु" ।

"आम्, मार्जारः, शुनकः, धेनुः, गजः, व्याघ्रः, सिंहः, शशकः, जम्बूकः" ।

"एतेषु मानवैः सह सादृश्यं कस्यापि अस्ति किम्?"

"अस्ति"।

"तर्हि तादृशः कः मृगः वर्तते? वदतु"।

"आम्, वानरः"।

"उत्तमम्। किन्तु मानवापेक्षया अस्य कः भेदः?"

"वानरस्य पुच्छम् अस्ति। सः चेष्टाः करोति । तस्य कार्याकार्यविवेकः न भवति"।

"सत्यं खलु? वानरजीवनसम्बद्धां कांश्चन कथां पठामः"।

**प्रवर्तनम् - १**

**टिप्पणीलेखनम्।**

**उद्देश्यम्** - चर्चां कृत्वा टिप्पणीलेखनम्।

**प्रक्रिया**

अध्यापकः छात्रान् सङ्घान् करोति। पाठस्यवाचनाय निर्दिशति। ततः छात्रसङ्घेषु कागदखण्डे अधोदत्तान् विषयान् लिखित्वा ददातु।

उदा - 'न मूर्खमुपदिशेत्' इति कथायां वानराः मूर्खाः।

- कथायां सूचीमुखः मूर्खः।

- कथायां वृद्धवानरः मूर्खः।

एकैकस्य संघस्यापि यः विषयः प्राप्तः तं विषयं साधूकृत्यैव छात्रैः चर्चायै सज्जीकरणं कार्यम्। तदर्थं प्रतिसङ्घं अध्यापकेन साहाय्यमपि दातव्यम्। अन्ते चर्चां क्रोडीकृत्य कः मूर्खः इति ते निर्णयं कुर्वन्तु। टिप्पणीं च लिखन्तु।

**मूल्यनिर्णयसूचकाः**

छात्राणां भागभागित्वम्।

मूल्यबोधविवेचनसामर्थ्यम्।

उचितभाषाप्रयोगः।

**प्रवर्तनम् - २**

**वार्तालेखनम्।**

**उद्देश्यम्** - भूतकालक्रियापदान्युपयुज्य लेखनसामर्थ्यं, वार्तालेखनसामर्थ्यं च।

**प्रक्रिया**

अध्यापकः अधोदत्तं विषयं चार्ट्पत्रे, श्यामफलके वा विलिख्य प्रदर्शयतु। ततः तस्य पठनाय छात्रान् निर्दिशति। प्रवर्तनमिदं व्यक्तिगतं भवतु।

खगः सूचीमुखः वानरानुपदेष्टुं प्रयतितवान्। वृद्धवानरः सूचीमुखं निवारयितुं यतते स्म। सुचीमुखस्योपदेशेन क्रुद्धः कश्चित् वानरः तं मारितवान्।

विषयमेनं छात्राः वार्तारूपेण लिखन्तु। वार्तालेखनावसरे शीर्षकं, शैली, भाषा एषु त्रिषु विषयेषु अध्यापकः अवधानवान् भवतु।

**वार्ता यथा -**

अनवसरचिन्तायाः परिणामः।

चित्रकूटम् : अनवसरचिन्तया चित्रकूटे कश्चित् खगः आपदि पतितः। सूचीमुखनामकोऽयं कस्यचित् वानरस्य उपदेशसन्दर्भे मारितोऽभवत्। गतदिने हेमन्तशैत्येन पीडिताः केचन वानराः शैत्यनिवारणोपायान् अन्विष्य चित्रकूटे भ्रमन्ति स्म। गुञ्जाफलानि अङ्गारान् मत्वा तेषां प्रज्वालनाय ते परिश्रमम् अकुर्वन्। वानराणां व्यर्थप्रयत्नं दृष्ट्वा तानुपदेष्टुम् अयं खगः वारं वारं प्रयतते स्म। अन्ते केनचित् क्रुद्धवानरेण खगोऽयं मारितः। स्थानीये आरक्षकनिलये एतत्सम्बद्धः व्यवहारः पञ्चीकृतोऽस्ति।

**मूल्यनिर्णयसूचका :**

उचिता वाक्यघटना।

उचितं शीर्षकम्।

आशयावबोधः।

**प्रवर्तनम् ३ -**

**वाक्यरचनाकेलिः (अव्ययपदानि उपयुज्य)**

**उद्देश्यम्** - अर्थावगमनेन वाक्यरचनासामर्थ्यम्।

**प्रक्रिया -**

अध्यापकः श्यामफलके कानिचन अव्ययपदानि लिखतु। यथा - गत्वा, दृष्ट्वा, स्वीकृत्य, विलोक्य इत्येवमादीनि।

छात्राः वैयक्तिकरूपेण तान्युपयुज्य वाक्यरचनां कुर्वन्तु। अध्यापकः तैः लिखितानि वाक्यानि कथापयतु। अन्ते शोधयित्वा श्यामफलके लिखतु। छात्राः वाक्यानि शुद्धानि कुर्वन्तु।

मौनम् - देवालयेषु मौनमाचरणीयम्।
बालाः मौनं भजन्ते।

वारं वारम् - गुरवः वारं वारं शिष्यान् उपदिशन्ति।
बालकाः पाठपुस्तकं वारं वारं पठन्ति।

विलोक्य - पिपासितः शिशुः मातरं विलोक्य सन्तुष्टः भवति।
आरक्षकान् विलोक्य चोरः धावति।

अनवरतम् - भक्ताः अनवरतम् ईश्वरस्मरणं कुर्वन्ति।
माता अनवरतं गृहकार्ये व्यापृता भवति।

**मूल्यनिर्णयसूचिका:**

अर्थावगमः।

उचितवाक्यलेखनम्।

वाक्यप्रयोगः।

**प्रवर्तनम् ४**

**कथास्तम्भक्रमीकरणम्।**

**उद्देश्यम्** - आशयमवगम्य कथारचनासामर्थ्यम्।

**प्रक्रिया**

अध्यापकः छात्रान् पाठभागस्य वाचनाय निर्दिशतु। ततः प्रवर्तनरूपेण दत्तानां कथास्तम्भस्य क्रमीकरणार्थं निर्दिशतु। तदर्थं प्रथमं तानि स्तम्भानि पठन्तु छात्राः। पठनावसरे केषाञ्चन अस्पष्टता भवति चेत् अध्यापकः कांश्चन प्रश्नान् पृच्छन्तु। प्रश्नानाम् उत्तरकथनेन कथास्तम्भानां क्रमीकरणं सुकरं भवति।

उदा - वानरसमूहः कुत्र अवसत्?

किम् असहमानाः वानराः कम्पन्ते?

शैत्यनाशनाय ते किं कृतवन्तः?

कः परिहसति?

वृद्धवानरः किम् अकरोत्?

वृद्धवानरः किम् उपदिष्टवान्?

पुनः पुनरपि सूचीमुखः किं कृतवान्?

अन्ते क्रुद्धः मर्कटः किमकरोत्?

ततः क्रमीकृतान् कथास्तम्भान् छात्राः कक्ष्यायाम् अवतारयन्तु। अवतारणसमये चर्चापि भवतु।

**कथास्तम्भक्रमीकरणम्**

एकस्मिन् वने वानरसमूहः अवसत्।

शैत्यमसहमानाः वानराः कम्पन्ते।

गुञ्जाफलानि स्वीकृत्य फूत्कुर्वन्ति।

सूचीमुखः परिहसति।

वृद्धवानरः उपदिशति।

वृद्धवानरस्य वाक्यं तिरस्कृत्य पुनः पुनः परिहसति।

क्रुद्धः एकः मर्कटः पक्षिणं मारयति।

मूर्खेभ्यः उपदेशः नाशाय भवति।

**मूल्यनिर्णयसूचिका :**

आशयावबोधः।

विवेचनसामर्थ्यम्।

पूर्वापरक्रमज्ञानम्।

**प्रवर्तनम् - ५**

**कथावतारणम्।**

**उद्देश्यम्** - कथाकथनसामर्थ्यम्।

**प्रक्रिया**

अध्यापकः कक्ष्यायां सूचीमुखस्य कथां ललितवाक्यान्युपयुज्य "कः कथितुं शक्तः" इति पृच्छतु। ततः कथाम् एवं कथापयतु।

उदा-

कस्मिंश्चित् वने वानरसमूहः अवसत्। तत्र सूचीमुखः नाम खगः अपि आसीत्। हेमन्तकालः समागतः। वृष्ट्या शैत्येन च क्लिष्टाः पक्षिणः स्वस्ववासस्थाने निवसन्ति स्म। किन्तु शैत्येन कम्पिताः वानराः गुञ्जाफलानि स्वीकृत्य फुत्कुर्वन्ति स्म। सूचीमुखः तद्दृष्ट्वा पर्यहसत्। सूचीमुखस्य वाचः विगणय्य वानराः पुनः पुनः फूत्कारं कुर्वन्ति स्म। सूचीमुखः पुनरपि पर्यहसत्। तदा कश्चन वृद्धवानरः एवम् अवदत् - "भोः! किं तवानेनोपदेशेन? व्याधं, मूर्खं, व्यसनसंस्थितं च यः उपदिशति, सः पराजयं प्राप्नोति। अतः मौनं भज" इति। सूचीमुखः तम् अनादृत्य तदेव अनवरतं वदति स्म। अन्ते कुपितः कश्चिद्वानरः सूचीमुखं गृहीत्वा अमारयत्।

मूर्खमुद्दिश्य उपदेशः विनाशाय भविष्यति।

**मूल्यनिर्णयसूचिकाः**

आशयावबोधः।

उचितभावः।

उच्चारणस्फुटता।

**प्रवर्तनम् - ६**

**लकाररूपाणि।**

**उद्देश्यम्** - लट्-लङ्लकाररूपाणां परिचायनम्।

प्रक्रिया

अध्यापकः कक्ष्यां प्रविश्य एकं छात्रम् उद्दिश्य "भवान् पुस्तकं पठतु" इति वदतु। तदा 'सः पुस्तकं पठति'। तत्पश्चात् (तस्य पठनानन्तरम्) "सः पुस्तकम् अपठत्" इति वदतु। पठति, अपठत् द्वयोरपि अर्थभेदः कः इति छात्राः वदन्तु। ततः पठति इति क्रियापदस्य भूतकालरूपम् अपठत् इति श्यामफलके लिखतु। एवम् अन्यानि कानिचन पदान्यपि लिखतु। ततः छात्रान् सङ्घद्वयं करोतु। प्रथमसङ्घं लट्रूपं वदतु। द्वितीयसङ्घं लङ्रूपं च वदतु। अध्यापकः क्रोडीकृत्य श्यामफलके लिखतु।

| लट् | लङ् |
|---|---|
| चलति | अचलत् |
| गच्छति | अगच्छत् |
| वसति | अवसत् |
| वदति | अवदत् |
| पतति | अपतत् |
| लिखति | अलिखत् |

**मूल्यनिर्णयसूचिका**

लट्-लङ्रूपाणां लेखनम्।

**अधिकविस्तरांशः।**

'वस्' धातुः(लङ्)

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अवसत् | अवसताम् | अवसन् |
| मध्यमपुरुषः | अवसः | अवसतम् | अवसत |
| उत्तमपुरुषः | अवसम् | अवसाव | अवसाम |

'चल्' धातुः(लङ्)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अचलत् | अचलताम् | अचलन् |
| मध्यमपुरुषः | अचलः | अचलतम् | अचलत |
| उत्तमपुरुषः | अचलम् | अचलाव | अचलाम |

अस धातुः(लङ्)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | आसीत् | आस्ताम् | आसन् |
| मध्यमपुरुषः | आसीः | आस्तम् | आस्त |
| उत्तमपुरुषः | आसम् | आस्व | आस्म |

**अनुबन्धप्रवर्तनम् -**

विशेषप्रयोगः (स्मप्रयोगः)

**उद्देश्यम् -** 'स्म' योगे लट् भूतकालार्थवाची इत्यवगम्यते।

**प्रक्रिया**

सर्वेषां क्रियापदानां लङ्लकाररूपाणि (भूतकालार्थकानि) समानानि न भवन्ति।

यथा पठति - अपठत्.

अर्चति - आर्चत्

प्रेषयति - प्रैषयत् इत्यादीनि।

अतः बहुत्र व्यवहारे क्लिष्टता आयाति। तन्निवारणाय कश्चन उपायः अस्ति। वर्तमानकालक्रियापदेन (लट्लकारेण) सह स्म योजनेन भूतकालीनः अर्थः लभ्यते।

अधिकविस्तारांशः

लट् स्मे - अष्टाध्यायी (सं - ०३-०२-१२८)

यथा - सीता वनम् अगच्छत्।

सीता वनं गच्छति स्म।

**मूल्यनिर्णयसूचिका**

उचितलकारमुपयुज्य लेखनम्।

संस्कृते बालकथासम्बन्धीनि अधोलिखितानि अधिकवाचनाय आश्रयणीयानि।

१. कथाकदम्बः - विश्वसंस्कृतप्रतिष्ठानम् कोट्टपुरम्, कोटुङ्ङल्लूर्।

२. बालकथा - गङ्गा बुक्स्। एस्.एम् स्ट्रीट्। कोषिक्कोट्।

३. श्रुण्वन्तु कथामेकाम् - अक्षरम्। बालबोधिनी गिरिनगरम्। बाङ्गलूरु।

**काकस्य उपायः।**

कश्चन महावृक्षः आसीत्। तत्र कश्चन काकः पत्न्या सह वसति स्म। तस्य एव वृक्षस्य कोटरे कश्चन कृष्णसर्पः अपि वसति स्म। यदा काकी प्रसूता भवति स्म तदा कृष्णसर्पः तस्याः शावकान् खादति स्म। एतेन काकः काकी च महत् दुःखम् अनुभवति स्म।

अतः एकदा काकः स्वमित्रस्य शृगालस्य समीपं गत्वा उक्तवान् - "भो मित्र, सः कृष्णसर्पः कथञ्चित् मारणीयः। भवान् किमपि उपायं सूचयतु" इति। शृगालः एकम् उपायं सूचितवान्। तत् श्रुत्वा काकः सन्तुष्टः अभवत्।

तदनन्तरं काकः उड्डीय नगरं गतवान्। तत्र महाराजस्य प्रासादस्य सरोवरे अन्तःपुरस्त्रियः जलक्रीडायां मग्नाः आसन्। तासां वस्त्राणि, आभरणानि च सरोवरस्य सोपानेषु स्थापितानि आसन्। काकः तत्र गतवान्। एकं सुवर्णहारं स्वीकृत्य अरण्याभिमुखं प्रस्थितवान्। तत् दृष्ट्वा राजभटाः काकम् अनुसृतवन्तः।

काकः अरण्यम् आगत्य महावृक्षस्य कोटरे तं हारं पातितवान्, स्वयं दूरं गतवान् च। राजभटाः तत्र आगतवन्तः। कोटरे ते हारं दृष्टवन्तः। तदा तत्र स्थितः कृष्णसर्पः कोपेन बहिः आगतवान्। राजभटाः दण्डप्रहारेण तं मारितवन्तः। तदनन्तरं काकः पत्न्या सह सुखेन जीवितवान्।